# ॥ નારાયણસહસ્રનામસ્તોત્રં શ્રીલક્ષ્મીનારાયણીયસંહિતાયામ્ ॥

.. Narayanasahasranamastotra from LakShminarayaniyasamhita ..

sanskritdocuments.org

August 20, 2017

# .. Narayanasahasranamastotra from LakShminarayaniyasamhita ..

# ॥ નારાયણસહસ્રનામસ્તોત્રં શ્રીલક્ષ્મીનારાયણીયસંહિતાયામ્ ॥

## Sanskrit Document Information

Text title : nArAyaNasahasranAmastotra lakShmInArAyaNIyasaMhitA adyAya 2.240

File name : nArAyaNasahasranAmastotraLNsaMhitA.itx

Category : sahasranAma, vishhnu, vishnu, narayana, stotra

Location : doc_vishhnu

Language : Sanskrit

Subject : hinduism/religion

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by : Sahana Sivakumar. Sivakumar Thyagarajan shivakumar24 at gmail.com, NA

Description-comments : Second book Adhyaya 20. This nArAyaNasahasranAma stotra is referenced in Purana Index for sahasranAmastotra.

Latest update : September 3, 2014

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ નારાયણસહસ્રનામસ્તોત્રં શ્રીલક્ષ્મીનારાયણીયસંહિતાયામ્ ॥

ૐ શ્રી ગણેશાય નમઃ
શ્રીકૃષ્ણ ઉવાચ
શૃણુ ત્વં રાધિકે ચાન્યં ચમત્કારં શ્રિયઃપતેઃ ।
કુંકુમવાપિકાક્ષેત્રે જાતં યોગેશ્વરં પ્રતિ ॥ ૧॥

વીતિહોત્રો મહોયોગી વને યોગેશ્વરોઽભવત્ ।
હિમાચલે બદર્યાં સ તપસ્તેપેઽતિદારુણમ્ ॥ ૨॥

સર્વયોગકલાઃ પ્રાપ યથા શંભુસ્તથાઽભવત્ ।
તેન યોગપ્રતાપેન દૃષ્ટા વૈ દિવ્યચક્ષુષા ॥ ૩॥

કેતુમાલે કૃતા યજ્ઞાઃ કેનાટેઽપિ કૃતા મખાઃ ।
અમરીણાં પ્રદેશેષુ કૃતં યદ્ધરિણા તુ તત્ ॥ ૪॥

ઊર્જાકૃષ્ણાષ્ટમીજન્મમહોત્સવશ્ચ યઃ કૃતઃ ।
શારદાપૂજનાદ્યં ચ હ્યન્નકૂટમહોત્સવઃ ॥ ૫॥

એતત્સર્વં દિવ્યદૃષ્ટ્યા વિજ્ઞાય પરમેશ્વરમ્ ।
કાંભરેયં બાલકૃષ્ણં દ્રષ્ટું સાક્ષાદુપાયયૌ ॥ ૬॥

આયયૌ કુંકુમવાપીક્ષેત્રે કૃષ્ણનારાયણમ્ ।
સહસ્રરૂપધર્તાઽસૌ વીતિહોત્રઃ સમાધિમાન્ ॥ ૭॥

માર્ગશીર્ષતૃતીયાયામશ્વપટ્ટસરસ્તટે ।
સેતુમાશ્રિત્ય ચ ન્યગ્રોધસ્યાઽધોઽધાન્નિજાસનમ્ ॥ ૮॥

સહસ્રરૂપધર્તાઽસૌ સંકલ્પ્ય નિષસાદ હ ।
મમ મૂલસ્વરૂપં ચાગત્યાઽઽશ્લિષ્યેત્ રમાપતિઃ ॥ ૯॥

તતઃ સહસ્રરૂપૈશ્ચાઽઽશ્લિષ્યેન્માં સ પ્રભુઃ પુનઃ ।
ઋષભસ્ય કારયેન્ચે સદ્ગુરોર્દર્શનં યદિ ॥ ૧૦॥

તદાઽહં શ્રીહરેરગ્રે નિવત્સ્યેઽત્ર સદાઽનુગઃ ।
મોક્ષં પ્રસાધયિષ્યેઽત્ર બદર્યા ન પ્રયોજનમ્ ॥ ૧૧॥

ન ગુરોરપરસ્યાપિ મોક્ષદો હિ ગુરુર્યતઃ ।
યત્રાત્મનો ભવેત્પુષ્ટિર્યેન તરતિ સાગરમ્ ॥ ૧૨॥

યસ્માચ્ચાત્મમહાશાન્તિસ્તં ગુરું ત્વાશ્રયેજ્જનઃ ।
યસ્માત્પાપવિનાશશ્ચ યસ્માદજ્ઞાનનાશનમ્ ॥ ૧૩॥

યસ્માદ્ વૃત્તિનિરોધશ્ચ વાસનાક્ષપણં યતઃ ।
યસ્માદાત્મપ્રકાશશ્ચ તં ગુરું ત્વાશ્રયેજ્જનઃ ॥ ૧૪॥

યસ્માચ્છિક્ષામવાપ્યેતૈશ્વર્યં ચમત્કૃતિં તથા ।
દિવ્યભાવમધિતિષ્ઠેત્તં ગુરું ત્વાશ્રયેજ્જનઃ ॥ ૧૫॥

ગુરવો બહવઃ સન્તિ લૌકિકાશ્ચાપ્યલૌકિકાઃ ।
લૌકિકેન હિ લોકસ્થાઃ કાર્યા વૈ ગુરવો યથા ॥ ૧૬॥

અલૌકિકેન શિષ્યેણાઽલૌકિકા ગુરવો ધૃતાઃ ।
મયાઽપ્યલૌકિકઃ સોઽયં કર્તવ્યો ભગવાન્ ગુરુઃ ॥ ૧૭॥

યત્ર સર્વં હિ કર્તવ્યં હરૌ પરિસમાપ્યતે ।
માતા ગુરુર્હિ જનુદા પિતા ગુરુર્હિ બીજદઃ ॥ ૧૮॥

અન્યે રક્ષાકરાઃ સન્તિ દેહસ્ય ગુરવો હિ તે ।
ભાષાજ્ઞાનકરાશ્ચાન્યે બાન્ધવાદ્યાશ્ચ યોષિતઃ ॥ ૧૯॥

તથા શિક્ષાકરાશ્ચાન્યે વિદ્યાદાનકરા અપિ ।
કલાકૌશલ્યશિક્ષાયા દાતારો ગુરવોઽપિ ચ ॥ ૨૦॥

ત એતે દેહયાત્રાયા ભવન્તિ ગુરવઃ ખલુ ।
આત્મજ્ઞાનપ્રદો યસ્તુ વિષ્ણુમન્ત્રપ્રદશ્ચ યઃ ॥ ૨૧॥

ધર્મવૃત્તિપ્રદો યશ્ચ ગુરુઃ શ્રેષ્ઠો હિ સમ્મતઃ ।
બ્રહ્મસ્થિતિપ્રદો યશ્ચ યોગસિદ્ધિપ્રદશ્ચ યઃ ॥ ૨૨॥

વૈશારદ્યપ્રદો બુદ્ધૌ ગુરુઃ શ્રેષ્ઠતરો હિ સઃ ।
નિર્મૂલાં વાસનાં કૃત્વા પરમેશપ્રદર્શકઃ ॥ ૨૩॥

આત્મના પરમાત્માનં પ્રાપકો દિવ્યમોક્ષદઃ ।
બ્રહ્મલોકપ્રેષકશ્ચ ગુરુઃ શ્રેષ્ઠતમો હિ સઃ ॥ ૨૪॥

ગકારસ્ત્વન્ધમજ્ઞાનં રકારો જ્ઞાનમુજ્જ્વલમ્ ।
અજ્ઞાનહા જ્ઞાનદશ્ચ ગુરુર્ગૌરવવાન્મતઃ ॥ ૨૫॥

ગમયત્યક્ષરં ધામ રમયત્યપિ ધામિના ।
ગુરુઃ સોઽયં મોક્ષદાતા નાન્યઃ શ્રેષ્ઠસ્તતો ગુરુઃ ॥ ૨૬॥

ગુરુર્યોગી બ્રહ્મચારી ધર્મી જ્ઞાની વિરાગવાન્ ।
સાધુશીલો ગુરુશ્ચાપિ નારાયણઃ પરો ગુરુઃ ॥ ૨૭॥

ભુક્તિદાતા મોક્ષદાતા સર્વસ્વદો હરિર્ગુરુઃ ।
ગુરોઃ સાક્ષાત્કારયિતા ગુરોર્ગુરુર્યતોઽત્ર સઃ ॥ ૨૮॥

સ એવ શ્રીહરિશ્ચાઽયં મુક્તાનાં પરમો ગુરુઃ ।
ગુરુઃ સર્વાવતારાણાં સતીનાં ચ સતાં ગુરુઃ ॥ ૨૯॥

ઈશ્વરાણાં તથા ધામ્નાં યોગિનાં સર્ગસંવિદામ્ ।
પૂર્વેષાં સૃષ્ટિકર્તૄણાં મહર્ષીણાં ધ્રુવાસિનામ્ ॥ ૩૦॥

પ્રજેશાનાં કર્મઠાનાં ભક્તાનાં ચ પરો ગુરુઃ ।
ગુરૂણાં યાવતામગ્ર્યો નારાયણગુરોર્ગુરુઃ ॥ ૩૧॥

અનાદિ શ્રીકૃષ્ણનારાયણઃ શ્રીકૃષ્ણવલ્લભઃ ।
શ્રીકૃષ્ણવલ્લભઃ સ્વાપી કાંભરેયઃ પરાત્પરઃ ॥ ૩૨॥

શ્રીમદ્ગોપાલબાલોઽયં સ્વામી વૈ સર્વદેહિનામ્ ।
મયા લબ્ધઃ સ મે પૂર્ણં કરિષ્યત્યેવ માનસમ્ ॥ ૩૩॥

નિવત્સ્યામિ ચરણેઽસ્ય પ્રાપ્સ્યામિ ધામ ચાક્ષરમ્ ।
સઞ્ચિન્ત્યેતિ વીતિહોત્રો ધ્યાનમગ્નઃ સહસ્રધા ॥ ૩૪॥

સહસ્રરૂપવાન્ જાતો દૃષ્ટ્વા તં માનવાસ્તટે ।
સ્નાતારોઽગુઃ પરશ્ચર્યં કસ્યેમાનિ સમાનિ વૈ ॥ ૩૫॥

રૂપાણિ, કે ચાગતા વૈ યોગિનોઽત્ર સહસ્રશઃ ।
સમવેષાઃ સમદેહાઃ સમાંગાઃ સન્તિ સદૃશાઃ ॥ ૩૬॥

સમકેશાઃ સમધ્યાનાઃ સમાનપરિમાણકાઃ ।
ભ્રાતરો વા ભવન્ત્યેતે ધામમુક્તા ભવન્તિ વા ॥ ૩૭॥

બદરીવાસિનો વાઽપિ શ્વેતમુક્તાઃ કિમાગતાઃ ।
શંકરસ્ય ગણાઃ કિંવા દેવાસ્તાપસરૂપિણઃ ॥ ૩૮॥

સાધ્યા વા દેવતા યદ્વા મેરુવાસા હિ તાપસાઃ ।

ક એતે તુ ભવેયુર્વૈ ચન્દ્રાસ્યા ભાસ્કરપ્રભાઃ ॥ ૩૯॥

ધ્યાનયોગા યોગિનો વા યોગીશ્વરાઃ સહસ્રશઃ ।
ન વદન્તિ ન પશ્યન્તિ ન પ્રાણાન્ ચાલયન્ત્યપિ ॥ ૪૦॥

સ્થિરમૌનાઃ સ્થિરચિતા ઈશ્વરાઃ સ્યુશ્ચ કેન્વિમે ।
ઇત્યેવં તર્કયન્તો વૈ કુંકુમવાપિકાજનાઃ ॥ ૪૧॥

સંઘશો વૈ સમાયાન્તિ દ્રષ્ટું કુતૂહલાન્વિતાઃ ।
કેચિન્નમન્તિ દૃષ્ટ્વૈવ પ્રશંસન્તિ વદન્તિ ચ ॥ ૪૨॥

પ્રતાપોઽયં બાલકૃષ્ણકૃપાનાથસ્ય વર્તતે ।
અસ્ય દર્શનલાભાર્થં નિત્યમાયાન્તિ યોગિનઃ ॥ ૪૩॥

અદૃશ્યા ઈદૃશાઃ સર્વેઽધુના તે દૃશ્યતાં ગતાઃ ।
રુદ્રાઃ સહસ્રશશ્ચાપિ વિષ્ણવશ્ચ સહસ્રશઃ ॥ ૪૪॥

સહસ્રસોઽપિ બ્રહ્માણો દ્રષ્ટુમાયાન્તિ સદ્વરમ્ ।
તથા મહર્ષયો નિત્યં પિતરો દેવતાસ્તથા ॥ ૪૫॥

સાધ્યા વિશ્વે ચ મરુતો દ્રષ્ટુમાયાન્તિ નિત્યશઃ ।
તીર્થાન્યપિ સમાયાન્તિ દિક્પાલાઃ સૃષ્ટિપાલકાઃ ॥ ૪૬॥

અથવા પાર્ષદા દિવ્યા ગોલોકાદિનિવાસિનઃ ।
સમાયાન્તિ ચ વૈકુણ્ઠપાર્ષદા અપિ નિત્યશઃ ॥ ૪૭॥

ગ્રહનક્ષત્રતારાશ્ચ સૂર્યાશ્ચન્દ્રાઃ સહસ્રશઃ ।
વૈમાનિકાઃ સમાયાન્તિ લોકાન્તરેભ્ય આદૃતાઃ ॥ ૪૮॥

વાલખિલ્યાઃ સમાયાન્તિ યદ્વા બ્રહ્મસભાદ્વિજાઃ ।
કિં વા ભવેયુર્ગાન્ધર્વા યક્ષા વા ધનદાશ્ચ વા ॥ ૪૯॥

ચારણાઃ પર્વતવાસા મુનયો વા વનસ્થિતાઃ ।
પરં સાદૃશ્યમેવૈષામપૂર્વત્વં વિગાહતે ॥ ૫૦॥

લલાટે વૈષ્ણવં પુણ્ડ્રં મસ્તકે તાપસી જટા ।
નેત્રમુદ્રા યોગપુષ્ટાઃ ખ્યાપયન્ત્યંશમાચ્યુતમ્ ॥ ૫૧॥

યે વા કે વા ભવેયુસ્તે સાક્ષાત્કૃતા યદત્ર તે ।
અસ્માભિર્દૈવયોગેન પુણ્યવદ્ભિઃ સુભાગ્યકૈઃ ॥ ૫૨॥

અવશ્યમેષાં વિઘ્નાનં ક્ષણેઽત્રૈવ ભવિષ્યતિ ।
ઇત્યેવં તે વદન્તશ્ચ પ્રજાઃ સંઘશ એવ હ ॥ ૫૩॥

પ્રપશ્યન્તિ સરસ્તીરે સહસ્રયોગિનસ્તદા ।
અથ શ્રીમદ્બાલકૃષ્ણો નારાયણગુરોર્ગુરુ ॥ ૫૪॥

સમાયયો સરસ્તીરે સન્નિધૌ યોગિનાં તદા ।
હાર્દં જાનઁસ્તદા તૂર્ણં પ્રવીક્ષ્ય મૂલરૂપિણમ્ ॥ ૫૫॥

સમુત્તોલ્ય સમાહૂય નામ્ના તં વીતિહોત્રક ! ।
ઉત્તિષ્ઠેતિ કરૌ ધૃત્વા કૃત્વા વક્ષસિ યોગિનમ્ ॥ ૫૬॥

સમાશ્લિષ્યદ્ધસઁસ્તૂર્ણં સ્વયં સહસ્રધાઽભવત્ ।
સમુત્થિતૈઃ સહસ્રસ્વરૂપૈરાશ્લિષ્યદચ્યુતઃ ॥ ૫૭॥

તતસ્તૂર્ણં હરિશ્ચૈકસ્વરૂપઃ સમ્બભૂવ હ ।
વીતીહોત્રોઽપિ સહસા ત્વેકરૂપો વ્યજાયત ॥ ૫૮॥

આશ્ચર્યચકિતા લોકા જયશબ્દાન્ પ્રચક્રિરે ।
તાવચ્છ્રીબાલકૃષ્ણોઽપિ બભૂવ ઋષભો ગુરુઃ ॥ ૫૯॥

વૃદ્ધઃ શ્વેતજટાયુક્તો વિવસ્ત્રો ધૂલિધૂસરઃ ।
વિચિત્ત ઇવ ચોન્મત્તો જિતસર્વેન્દ્રિયો યતિઃ ॥ ૬૦॥

સ્વભાવતેજસા વ્યાપ્તો બ્રહ્મનિષ્ઠાપરઃ પુમાન્ ।
અપ્રાકૃત ઇવ ત્વાસ્તે વિમના ઇવ દેહિષુ ॥ ૬૧॥

વીતિહોત્રોઽપિ ચ ગુરુમૃષભં વીક્ષ્ય દણ્ડવત્ ।
ચકાર બહુધા તત્ર તુષ્ટાવ પરમેશ્વરમ્ ॥ ૬૨॥

ત્વં ગુરુસ્ત્વં ચાન્તરાત્મા ઋષભસ્ત્વં ચ યોગિરાટ્ ।
યોગેશ્વરો ભવાનેવ ત્વં ચેશસ્ત્વં પરેશ્વરઃ ॥ ૬૩॥

ત્વં મુક્તસ્ત્વં મહામુક્તો મુક્તેશ્વરો ભવાનપિ ।
અક્ષરં ત્વં ભવાન્ બ્રહ્મ પરબ્રહ્મ ભવાનપિ ॥ ૬૪॥

ભગવાન્ કૃષ્ણ એવાસિ કૃષ્ણનારાયણોઽસિ ચ ।
અનાદિશ્રીકૃષ્ણનારાયણસ્ત્વં પરમેશ્વરઃ ॥ ૬૫॥

અવતારાઃ ઋષભાદ્યાસ્તવૈવ શ્રીપતે વિભો ।
રાધાપતિસ્ત્વમેવાઽસિ લક્ષ્મીપતિસ્ત્વમેવ ચ ॥ ૬૬॥

વાસુદેવીપતિસ્ત્વં ચ નારાયણીપતિસ્તથા ।
મુક્તપતિર્બ્રહ્મપતિર્ધામપતિસ્ત્વમેવ ચ ॥ ૬૭॥

મહાકાલસ્ય હેતુસ્ત્વં મહાવિષ્ણોશ્ચ કારણમ્ ।
સદાશિવસ્ય હેતુસ્ત્વં વૈરાજસ્ય ચ કારણમ્ ॥ ૬૮॥

ભૂમા ત્વં પૂરુષસંજ્ઞઃ પુરુષોત્તમ ઇત્યપિ ।
બ્રહ્મવિષ્ણુમહેશાનાં રુદ્રાણાં સર્જકો ભવાન્ ॥ ૬૯॥

દેવાનાં લોકપાલાનાં પિતૄણાં સર્જકો ભવાન્ ।
મહર્ષીણાં યતીનાં ચ સાધૂનાં સર્જકઃ સતામ્ ॥ ૭૦॥

સતીનાં કમલાદ્યાનાં પતિઃ પાતા ચ વૈ ભવાન્ ।
સુરાણાં માનવાનાં ચ પશૂનાં પક્ષિણાં તથા ॥ ૭૧॥

વલ્લીનાં ચ દ્રુમાણાં ચ સર્જકસ્ત્વં રસપ્રદઃ ।
કામધેનુકામવલ્લીચિન્તામણ્યાદિસર્જકઃ ॥ ૭૨॥

યક્ષરક્ષઃપિશાચાનાં સર્જકસ્ત્વં ખચારિણામ્ ।
વારિજાનાં વનસ્થાનાં ભૂગર્ભાણાં પ્રસર્જકઃ ॥ ૭૩॥

દૈત્યાનાં દાનવાનાં ચ સર્જકસ્ત્વં જનાર્દનઃ ।
દીનાનાથદરિદ્રાનાં રક્ષકઃ પોષકો ભવાન્ ॥ ૭૪॥

આશ્રિતાનામન્નદાતા શરણ્યશ્ચાર્તિદેહિનામ્ ।
કામુકાનાં કામદાતા સકામાનાં પ્રપૂરકઃ ॥ ૭૫॥

ત્વં નારી ત્વં નરશ્ચાસ્સે ત્વં ગર્ભસ્ત્વં કુમારકઃ
ત્વં બીજં ત્વં સસ્યરૂપસ્ત્વં પુષ્પં ફલમિત્યપિ ॥ ૭૬॥

ત્વમિન્દ્રસ્ત્વમિન્દ્રિયસ્ત્વં નિદ્રા ત્વં જાગરો ભવાન્ ।
ત્વં સુષુપ્તિર્મહાનન્દસ્ત્વં પ્રીતિસ્ત્વં રતિસ્તથા ॥ ૭૭॥

મન્મથસ્ત્વં મનોજન્યો મનઃસંસ્થો ભવાનપિ ।
જ્ઞાનં જ્ઞાતા જ્ઞેયમેવ ત્વમેવાઽસિ પરેશ્વર ॥ ૭૮॥

ત્વમ્ ઋતુસ્ત્વં દિનં રાત્રિસ્ત્વમુદ્યોગો વિરામકઃ ।

ત્વં વિશ્વાસશ્ચાશ્રયશ્ચ ત્વં માતા ચ પિતા ગુરુઃ ॥ ૭૯॥

ધનં ધાન્યં ત્વમેવાઽસિં શક્તિર્બલં ત્વમેવ ચ ।
નીતિર્ભક્તિર્વૃષો રાગો વૈરાગ્યં ચ ત્વમેવ હ ॥ ૮૦॥

ત્વં પ્રાણસ્ત્વં જીવનં ચ નૈકધા ચૈકધા ભવાન્ ।
પ્રકાશસ્ત્વં પ્રવૃત્તિસ્ત્વં નિરોધસ્ત્વં ગુણાત્મકઃ ॥ ૮૧॥

ગુણાતીતસ્ત્વમેવાઽસિ સર્વસિદ્ધિગુણાશ્રયઃ ।
આશ્ચર્યં ત્વં ચમત્કારસ્ત્વમૈશ્વર્યં પ્રભુત્વકમ્ ॥ ૮૨॥

ત્વં ભૂર્જલં ભવાઁસ્તેજોઽનિલસ્ત્વં ત્વં તથાઽનલઃ ।
ત્વં ખં ત્વં માત્રકં ત્વં ચ બુદ્ધિસ્ત્વં ચૈષણાત્રયમ્ ॥ ૮૩॥

ત્વં પરીક્ષા તિતિક્ષા ત્વં ત્વં બુભુક્ષા મુમુક્ષતા ।
ત્વં સ્નેહસ્ત્વં ધ્યાનવૃત્તિસ્ત્વં સમાધિઃ પરાત્પરઃ ॥ ૮૪॥

ઉપાસ્તિસ્ત્વં ચિત્તચૈત્યં ત્વં જાડ્યં ત્વં તથાઽણુતા ।
ત્વં સામ્યં ત્વં ચ વૈષમ્યં ત્વમેવ સર્વમેવ હ ॥ ૮૫॥

અહં ત્વં વીતિહોત્રસ્ત્વં ત્વં ગુરુઃ ઋષભસ્તથા ।
તવૈવાંઽશકલાઽઽવેશવિભૂતિસૃષ્ટિજં ત્વિદમ્ ॥ ૮૬॥

યત્ કિંચિદ્ દૃશ્યતે ચાપિ ભુજ્યતે લીયતેઽપિ ચ ।
યસ્માદ્ યત્ર ચ યેનાપિ યદર્થં ચ ત્વમેવ સઃ ॥ ૮૭॥

તસ્મૈ કૃષ્ણાય નાથાય બ્રહ્મણે પરબ્રહ્મણે ।
સમર્પયામિ ચાત્માનં વીતિહોત્રાભિધં સદા ॥ ૮૮॥

દાનમેવ ન તુ ન્યાસં નાપિ કુસીદકં તથા ।
યથેષ્ટવિનિયોગાર્હં સમર્પયામિ માં ત્વહમ્ ॥ ૮૯॥

ઇતિ સ્તુત્વા રાધિકે સમ્પપાત પાદયોર્હરેઃ ।
વીતિહોત્રશ્ચાઽથ કૃષ્ણસ્તમુત્થાપયદૂર્ધ્વકમ્ ॥ ૯૦॥

સમાશ્લિષ્ય પુનર્હસ્તૌ દત્વા તસ્ય ચ મૂર્ધનિ ।
ન્યયુંક્ત વરલાભાર્થં વીતિહોત્રં હરિર્યદા ॥ ૯૧॥

વીતિહોત્રસ્તદા પ્રાહ સ્થાસ્યેઽત્ર તવપાદયોઃ ।
અન્તે મોક્ષં ગમિષ્યસ્યક્ષરં ધામ તવ પ્રભો ॥ ૯૨॥

દેહિ વાસં સદા ચાત્ર તથાસ્તૂવાચ વૈ હરિઃ ।
રાધિકે તન્મહત્તીર્થમ્ ઋષભાખ્યં સરોવરે ॥ ૯૩॥

વીતિહોત્રાભિધં તીર્થં સહસ્રયોગિતીર્થકમ્ ।
એવં નામ્ના તદેવાસીત્ પ્રસિદ્ધં મોક્ષદં શુભમ્ ॥ ૯૪॥

હરિર્બભૂવ સહસા બાલકૃષ્ણસ્વરૂપધૃક્ ।
પ્રયયૌ ચ નિજાવાસં વીતિહોત્રસ્તટે સ્થિતઃ ॥ ૯૫॥

વટવૃક્ષં સમાશ્રિષ્ય તાપસો જનદર્શનઃ ।
તત્ર તીર્થે કૃતસ્નાનાઃ પ્રાપ્સ્યન્તિ પરમાં ગતિમ્ ॥ ૯૬॥

યોગસિદ્ધિમવાપ્સ્યન્તિ યોગાભ્યાસં વિનાઽપિ ચ ।
રાધિકે તત્ર સંસ્નાન્નાશમેષ્યન્તિ પાતકમ્ ॥ ૯૭॥

આર્દ્રં શુષ્કં મહત્સ્વલ્પં પરપીડાકરં ચ યત્ ।
સર્વં નશ્યતિ પાપં તજ્જલપાનાદપિ દ્રુતમ્ ॥ ૯૮॥

તત્રાઽન્નદાનતઃ સ્યાત્તુ વાજિમેધસમં ફલમ્ ।
ઋષભસ્યાઽઽલયકર્તુર્મમ ધામાઽક્ષરં ભવેત્ ॥ ૯૯॥

ઇત્યેવં ભગવાનાહ રાધિકે તીર્થવૈભવમ્ ।
પઠનાચ્છ્રવણાચ્ચાસ્ય ભવેત્તત્તીર્થજં ફલમ્ ॥ ૧૦૦॥

॥ ઇતિશ્રીલક્ષ્મીનારાયણીયસંહિતાયાં દ્વિતીયે ત્રેતાસન્તાને
વીતિહોત્રયોગેશ્વરાય ઋષભરૂપેણ સહસ્રરૂપેણ ચ
હરેર્દર્શનમ્, ઋષભતીર્થીકરણમ્, સ્તુતિશ્ચેત્યાદિનિરૂપણનામા
ચત્વારિંશદધિકદ્વિશતતમોઽધ્યાયઃ ॥

From Laxminarayaniyasamhita khaNDa 2 adhyAya 240
This does not really have 1000 names but perhaps with the mention of "sahasrarUpeNa harerdarshanam" in the end it is considered /referenced in Purana Index for sahasranAmastotra.
Encoded by Sivakumar Thyagarajan shivakumar24 at gmail.com
Proofread by Sahana Sivakumar, Sivakumar Thyagarajan, NA

.. Narayanasahasranamastotra from LakShminarayaniyasamhita ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*